D.A.V. PUBLIC SCHOOL, THANE
SESSION: 2022 - 2023
PERIODIC TEST – III (SET-A)
SUBJECT: SANSKRIT

Std.: VIII **Max Marks :40**
Date: 26/12/2022 **Time: 01.30HRS.**

सामान्य निर्देशा:-

1. सम्पूर्णे प्रश्नपत्रे चत्वार: भागा: सन्ति।

2. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

3. उत्तरलेखनात् पूर्वं प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।

4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

5. प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

खण्ड क - (अपठित-अवबोधनम्) (5 अङ्का:)

भारते उत्सवा: द्विविधा: भवन्ति - राष्ट्रीया: उत्सवा: तथा च पारम्पारिका: उत्सवा:। 1947 तमे वर्षे भारतदेश: स्वतन्त्र: जात:। अत: सम्पूर्णे देशे स्वतन्त्रता दिवसस्य एष: उत्सव: आयोज्यते। एवमेव 1950 तमवर्षत: गणतन्त्रदिवसस्य समारोहस्य आयोजनं प्रतिवर्षं भवति। एतौ अस्माकं राष्ट्रीयौ उत्सवौ स्त:।

दीपावली:, होलोकोत्सव:, दशहरा, ओणम, श्रावणपूर्णिमा आदय: च पारम्परिक-उत्सवा: सन्ति। एतेषु उत्सवेषु एक: विशिष्ट: उत्सव: श्रावणपूर्णिमा अस्ति। एतत् दिनं भारतशासनेन संस्कृतदिनत्वेन घोषितम् अस्ति। अत: सम्पूर्णे देशे संस्कृतप्रेमिन: संस्कृत-उत्सवं संस्कृत-दिनं च आयोज्यन्ते। संस्कृत-नाटकानां मञ्चनम्, परिचर्चा, श्लोकोच्चारणम्, श्लोकोच्चारणम्, संवादा:, प्रदर्शनी, गीतगायनम्, कथाकथनम् इत्यादय: बहव: कार्यक्रमा: समग्रे देशे आयोज्यन्ते। संस्कृतम् अस्माकं देशस्य गौरवम् अस्ति। संस्कृतभाषायाम् एव अस्माकं संस्कृति: आधारिता अस्ति। अत: सर्वे जना: संस्कृतस्य रक्षां कुर्यु:। कथ्यते अपि - भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृति: तथा।

अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(½x2=1)**

1) भारते उत्सवा: कतिविधा: भवन्ति?

2) अत: सर्वे जना: कस्य रक्षां कुर्यु?

3) श्रावणपूर्णिमा कीदृश: उत्सव: अस्ति।?

आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) के पारम्परिक-उत्सवा: सन्ति ?

2) अस्माकं देशस्य गौरवम् किम् अस्ति ?

3) संस्कृतभाषायाम् का आधारिता अस्ति?

इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत - **(1)**

ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) **(½x2=1)**

1) 'एतौ अस्माकं राष्ट्रीयौ उत्सवौ स्त:।' अस्मिन् वाक्ये **राष्ट्रीयौ** इति पदस्य विशेष्यपदं किम् अस्ति?

(क) उत्सवौ (ख) एतौ (ग) स्त:

2) **'कुर्यु:'** इति क्रियापदस्य कर्तृपदं गद्यांशे किम् प्रयुक्तम् ?

(क) अत: (ख) संस्कृतस्य (ग) जना:

3) **'सामान्य:'** इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) समग्रे (ख) विशिष्ट: (ग) ओणम्

खण्ड - ख (रचनात्मक-कार्यम्) (5 अङ्का:)

प्रश्न: 2. अधोलिखितानि वाक्यनि संस्कृतभाषया अनुवादं कृत्वा लिखत - (केवलं पञ्चवाक्यानि) **(1x5=5)**

1) राम पुस्तक पढ़ रहा है ।

2) तूने क्या खाया ?

3) मैं कल जाऊँगी।

4) बंदर घर के उपर है।

5) राधिका खेलने के लिए जा रही है ।

6) तुम सब यहाँ आओ।

7) छात्र पानी पीकर बैठता है।

खण्ड - ग (अनुप्रयुक्त-व्याकरणम्) (12 अङ्का:)

प्रश्न: 3. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

1) एतत् पुस्तकं **मम + एव** अस्ति।

2) **प्रत्येक:** छात्र: गीतं गायति।

3) राम: मित्रस्य **सु + आगतम्** करोति।

4) नदीतीरे **वनौषधि:** भवति।

5) बालक: **पितृ + आज्ञां** पालयति।

6) वर्षाकाले **सदैव** वर्षा भवति।

प्रश्न: 4. अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) लक्ष्मण: ..... पृष्ठत: चलति। क) रामेण ख) रामस्य ग) रामात्

2) महात्मा ..... विना अतिष्ठत्। क) भोजने ख) भोजनाय ग) भोजनात्

3) मूषकराज: ..... स्निह्यति। क) मूषकेषु ख) मूषकेभ्य: ग) मूषकान्

प्रश्न: 5. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

1) बालिका **अध्यापिकाया:** पुरत: चलन्ति।

2) शारदा **उमेशात्** पृथक् कार्यं करोति।

3) मम माता **चित्रकलायां** निपुणा अस्ति।

प्रश्न: 6. अधोलिखितवाक्येषु अङ्कानां स्थाने उपयुक्तं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्य: चित्वा लिखत - **(1x4=4)**

1) .....(55) छात्रा: भ्रमणाय गच्छन्ति।

क) पञ्चाशत् ख) पञ्चपञ्च ग) पञ्चपञ्चाशत्

2) वृक्षे ..... (96) खगा: निवासं कुर्वन्ति।

क) षड्नव: ख) षण्णवति: ग) नवषष्टि:

3) मम समीपे .....(73) रुप्यकाणि सन्ति।

क) त्रिसप्तति: ख) सप्तत्रिंशत् ग) सप्तत्रीणि

4) वने .....(81) गजा: सन्ति।

क) एकाशीति: ख) अष्टादश ग) अष्टएकम्

खण्ड घ - <u>पठित-अवबोधनम्</u> (18 अङ्का:)

प्रश्न: 7. अधोदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - (4)

मूषकाः तं शृगालं नत्वा परस्परं वदन्ति- एषः शृगालः कश्चन् महात्मा एव | वयम् प्रतिदिनम् अत्र आगत्य अस्य सेवां कृत्वा पुण्यं प्राप्स्यामः | मूषकाः प्रतिदिनं तं श्रृगालं सेवितुं तत्र आगच्छन्ति स्म | अवसरं च प्राप्य सः धूर्तः श्रृगालः प्रतिदिनम् एकं मूषकं खादति स्म। केषुचित् दिवसेषु स: श्रृगाल: हृष्टः पुष्टः अभवत् | इदं दृष्ट्वा मूषकाः परस्परं वार्तालापं कुर्वन्ति | एकः मूषकः मूषकराजं प्रणम्य अवदत्- महाराज! सः श्रृगालः वायुं भक्षयित्वा अपि हृष्टः पुष्टः अभवत् | परन्तु अस्माकं सङ्ख्या न्यूना जाता | वयं शङ्काशीला: स्म: ।

क) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (½x2=1)

1) परस्परं वार्तालापं कुर्वन्ति ? 3) श्रृगाल: कीदृश: अभवत्?

2) क: कश्चन् महात्मा एव?

ख) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)

1) मूषकाः प्रतिदिनं कं सेवितुं तत्र आगच्छन्ति स्म? 3) मषूकाणां का न्यूना जाता?

2) अवसरं च प्राप्य सः धूर्तः श्रृगालः किं करोति स्म ?

ग) निर्देशानुसारम् उत्तरत - (½x2=1)

1) '**खादित्वा**' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

2) '**तं श्रृगालं**' अनयो: पदयो: विशेष्यपदं किम् अस्ति?

प्रश्न: 8. अधोदत्तं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - (4)

"पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः |
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ||"

क) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (½x2=1)

1) के फलानि न खादन्ति ? 3) के सस्यं न अदन्ति?

2) सतां विभूतय: किमर्थं भवन्ति?

ख) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)

1) का: स्वयमेव अम्भ: न पिबन्ति ? 3) परोपकाराय सतां किं भवति?

2) वारिवाहा: खलु किं न अदन्ति ?

ग) निर्देशानुसारम् उत्तरत - (½x2=1)

1) '**स्वयं न खादन्ति फलानि वृक्षाः**' अस्मिन् वाक्ये **खादन्ति** इति क्रियापदस्य कर्तृपदं किम् अस्ति?

2) '**जलम्**' इति पदस्य किं पर्यायपदं पद्यांशे प्रयुक्तम् अस्ति?

प्रश्न: 9. मञ्जूषात: उचितपदानि चित्वा अधोदत्तं पूर्णं अन्वयं लिखत - (½x4=2)

"वाणी रसवती यस्य, यस्य श्रमवती क्रिया |
लक्ष्मीः दानवती यस्य, सफलं तस्य जीवितम् ||"

अन्वय: - यस्य वाणी 1....., यस्य 2..... श्रमवती, 3..... लक्ष्मीः दानवती (अस्ति), तस्य जीवितं 4 ..... (भवति) |

मञ्जूषा - सफलं, क्रिया, रसवती, यस्य ।

प्रश्न: 10. मञ्जूषात: उचितपदानि चित्वा अधोदत्तं सम्पूर्णं भावार्थं लिखत - (½x4=2)

- **बुद्धिर्यस्य बलं तस्य |**

भावार्थ: - .....1..... एव मनुष्यस्य वास्तविकं .....2..... अस्ति | बुद्ध्या एव .....3..... शक्तिं प्राप्नोति | अतः यः बुद्धिमान् अस्ति सः एव वस्तुतः .....4..... अस्ति |

मञ्जूषा - बलम्, शक्तियुक्तः, बुद्धिः, मनुष्यः ।

प्रश्न: 11. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्) (4)

1) जनेषु **भ्रातृभाव**: भवेत् ।
2) **क्रोधेन** कार्यं न सिध्यति ।
3) महात्मा सहजरूपेण तस्य **निमन्त्रणं** स्वीकृतवान् ?
4) **क्षुधया** समं शरीरपीडनं न भवति।
5) मूषका: **बिलात्** बहि: आगच्छन्ति ।

प्रश्न: 12. उचितपदै: मेलनं कुरुत - (½x4=2)

1) लक्ष्मी:
2) अनृतम्
3) भवन्तु
4) मृगा:

मञ्जूषा - सन्तु, धनम्, पशवः, असत्यम्

---------- इति ----------